षष्ठः पाठः

# गीतामृतम्

यद् यदाचरति श्रेष्ठस्तत् तदेवेतरो जनः ।

स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ।।1।।

च×चलं हि मनः कृष्ण!, प्रमाथि बलवद्दृढम् ।

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।।2।।



काम एष क्रोध एश रजोगुणसमुद्भवः ।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।3।।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।

कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ।।4।।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।5।।

## शब्दार्थ

**इतरः**=दूसरा। **अनुवर्तते**=अनुकरण करते हैं। **प्रमाथि**=मन्थन करने वाला। **निग्रहम्**=नियन्त्रण। **सुदुष्करम्**=कठिन। **रजोगुणसमुद्भवः**=रजोगुण से उत्पन्न। **महाशनः**=बहुत अधिक भोजन करने वाला। **महापाप्मा**=महान् पाप वाला (पाप करने वाला)। **विद्ध्येनमिह**= (विद्धि + एनम् + इह) यहाँ, इसे जानो। **मा शुचः**=शोक मत करो।

## अभ्यास

1. उच्चारण करें-

श्रेष्ठस्तत्    तदेवेतरः    लोभस्तस्मादेतत्

प्रमाथि    बलवद्दृढम्    नाशनमात्मनः

2. एक पद में उत्तर दें-

(क) लोकः किम् अनुवर्तते ?

(ख) कस्य निग्रहः सुदुष्करः ?

(ग) कामः क्रोधस्तथा लोभः कस्य द्वारम् ?

(घ) अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि" इति कः अकथयत् ?

3. मंजूषा  से उचित पदों को चुनकर वाक्य पूरा करें-

नरकस्य चंचलम् शरणम् इतरः

(क) श्रेष्ठः जनः यथा आचरति तथैव .................... जनः आचरति।

(ख) हे कृष्ण ! मनः .................... भवति।

(ग) कामः क्रोधः लोभः च त्रिविधम् .................... द्वारम् अस्ति।

(घ) कृष्णः अवदत्- हे अर्जुन ! मामेकम् .................... व्रज।

**शिक्षण-संकेत**

1. श्रीमद्भगवद्गीता के इन श्लोकों का सामूहिक सस्वर पाठ कराएँ।

2. रणभूमि में अर्जुन को कृष्ण द्वारा दिये गये उपदेश सम्बन्धी प्रसंग की चर्चा कराएँ।

**अतिपरिचयाद् अवज्ञा।**